# Discussion of Sanskrit (Literature) in Utkala-Odisha

## ઉત્કલેષુ સંસ્કૃતચર્ચ્ચા

## Document Information

Text title : Discussion of Sanskrit (Literature) in Utkala/Orissa

File name : utkaleShusaMskRRitacharchchA.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : May 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2021

*sanskritdocuments.org*

# ઉત્કલેષુ સંસ્કૃતચર્ચ્ચા

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

સુરમુખરસભોક્ત્રે ભોગમોક્ષૈકદાત્રે
નવનિધિગુણધાત્રે સ્વાત્મવિજ્ઞાનગોપ્ત્રે ।
સરલમધુરવક્ત્રે લોકકલ્યાણકર્ત્રે
વિપુલસુખવિધાત્રે સંસ્કૃતાય પ્રણામઃ ॥

ઉત્કલીયાઃ સંસ્કૃતપ્રિયાઃ । સંસ્કૃતં સાર્વભૌમિકમ્ । અમરભાષા-સમુજ્જ્વલં સંસ્કૃતં ન કસ્યાપિ વિશિષ્ટ-જાતેરુપકારકં નાપિ સાંપ્રદાયિકત્વેન પરિચિતમ્, અપિતુ સમેષાં માનવ-જાતીનાં મંગલં વિધાતું સર્વસમર્થમિતિ નાતિશયોક્તિઃ । સંસ્કૃતેષુ સર્વાદૌ સંગીતશાસ્ત્રં વિચાર્યતે । રસસ્વરૂપં સંગીતમ્ । યં પીત્વા કૃતકૃત્યો જાયતે જનઃ । ભારતીય-સંસ્કૃતૌ સંગીતસ્ય સ્થાનં ચરમં પરમઞ્ચ । કલા-સાહિત્ય-ક્ષેત્રે સંગીતસ્ય પ્રાધાન્યતા દરીદૃશ્યતે । જનજીવને સંસ્કૃતિક્ષેત્રે સંગીતસ્ય મહતી આવશ્યકતા વર્તતે । છન્દોવદ્ધં પદ્યાત્મકં લય-તાલયુક્તં સંગીતં વાદ્ય-નૃત્યાદિભિઃ લોલાયિતમ્ । ઉત્કલીય-આર્ય-અનાર્ય-જનજાતીનાં સર્વેષાં સંગીતક્ષેત્રે અવાધપ્રવેશઃ । તે સ્વ-સ્વ ભાષામાધ્યમેન ભાવાનુકૂલં સંગીતં રચયન્તિ,પરિવેષયન્તિ ચ ।

સંસ્કૃતભાષાયાં સંગીતક્ષેત્રે મહાકવિ-જયદેવઃ સર્વાદૌ સુપરિચિતશ્ચિરનમસ્યઃ, વિશ્વપ્રસિદ્ધ ઉત્કલીયઃ । તન્નિર્મિતં ગીતગોવિન્દં ન કેવલં શ્રીમન્દિરે અપિ તુ ખિલેષુ ભારતવર્ષેષુ ધર્મગ્રન્થરૂપેણ વિવેચિતમ્ । પુરા શ્રીજગન્નાથમન્દિરે દેવદાસી-નૃત્યપ્રથા પ્રચલિતા આસીત્ । નૃત્યેન સહ સંગીતમનિર્વાર્યમિતિ મનસિ નિધાય મહાપ્રભોઃ શ્રીજગન્નાથસ્ય શ્રીકૃષ્ણસ્વરૂપં ધ્યાયં ધ્યાયં તન્નિર્દેશેન ચ કોમલકાન્તપદાવલિભિઃ સુસજ્જિતં જયદેવો ગીતગોવિન્દં રચિતવાન્ । પશ્ચાત્ પરવર્તિનો બદ્ધપરિકરાઃ કવયઃ સંગીતક્ષેત્રે પ્રવિષ્ટાઃ । સફલીભૂતાશ્ચ । સમુત્પન્નેષુ કવિષુ કેષાંચન નામાનિ અત્ર ન વિસ્મર્તવ્યાનિ ।

કવિચન્દ્ર-રાય-દિવાકર-મિશ્રેણ નિર્મિતં તત્પૃષ્ઠપોષક-ગજપતિ-પુરુષોત્તમદેવ-નામ્ના ભણિતં દશસર્ગ-વિશિષ્ટં "અભિનવ ગીતગોવિન્દમ્", પઞ્ચદશ-શતાબ્ધ્યાં રાય-રામાનન્દેન લિખિતં "જગન્નાથવલ્લભ" -નાટકમ્, જયદેવાચાર્યસ્ય "પીયૂષલહરી" - એકાંકિકા, યતીન્દ્ર-રઘુત્તમ તીર્થસ્ય "મુકુન્દવિલાસ" -મહાકાવ્યમ્, કૃષ્ણદાસકૃત-"ગીતપ્રકાશઃ", નિત્યાનન્દકવિકૃત "શિવલીલામૃતમ્", તકૃત-" શ્રીકૃષ્ણલીલામૃતમ્", શતદેવ-મિશ્રસ્ય "મુદિતમાધવમ્", અનાદિ-મિશ્રસ્ય "મણિમાલા" -નાટિકા-" કેલિકલ્લોલિની" - "રસગોષ્ઠી" રૂપકાનિ પ્રણિધાનયોગ્યાનિ ભવન્તિ । ષોડશ-શતાબ્ધ્યાં મોગલ-સામ્રાજ્યે સુપરિચિત-આકવર-સભાપણ્ડિતઃ સંગીતજ્ઞઃ

કૃષ્ણદાસ બડજેના મહાપાત્રઃ “ગીતપ્રકાશં” રચિતવાન્ । તસ્મિન્ સમયે હલધર મિશ્રસ્ય “સંગીતકલ્પલતા”, હરિચન્દનસ્ય “સંગીત-મુક્તાવલી”, સપ્તદશ-શતાબ્ધ્યાં રઘુનાથ રથસ્ય “નાટ્યમનોરમા” “સંગીતાર્ણવ-ચન્દ્રિકા”, નારાયણ મિશ્રસ્ય “સંગીતસરણિઃ”, કવિચન્દ્ર-પુરુષોત્તમ-મિશ્રસ્ય “તાલસર્વસ્વઃ”, શાર્ગંદેવસ્ય “સંગીતરત્નાકરઃ”, પારલાખેમુણ્ડિરાજ-ગજપતિ-જગન્નાથ-નારાયણદેવસ્ય “સંગીતનારાયણઃ”, પદ્મનાભ-નારાયણ-દેવસ્ય “તાલસર્વસારસંગ્રહઃ”, “ચતુર્દણ્ડિપ્રકાશિકા” - “રાગચિત્રાદીનિ” સંગીત-પુસ્તકાનિ રસસિક્તાનિ સન્તિ । અષ્ટાદશ-શતાબ્ધ્યાં ગોવિન્દ-કવિભૂષણ-સામન્તરાયસ્ય “સમૃદ્ધમાધવ” -નાટકમ્, કમલ લોચન ખડ્ગરાયસ્ય “સંગીત ચિન્તામણિઃ”, “ગીતમુકુન્દમ્”, વ્રજયુવવિલાસાદીનિ સંગીત-શાસ્ત્રાણિ ચ સમુદ્ભવાનિ । કાવ્યાલંકાર-નાટક-એકાંકિકાદિ-ક્ષેત્રેષુ ગંજામ-મણ્ડલાધિપ-શેરગડ-રાજ્યાધિપતિ-જનાર્દન-પ્રોત્સાહિત-કવિના શિતિકંઠેન દ્વાદશસર્ગવિશિષ્ટં “ગીતસીતાવલ્લભમ્” મહાકાવ્યં પ્રસ્તુતમ્ । દ્વાદશતતાબ્ધ્યાં કોણાર્ક-સૂર્ય-મન્દિરનિર્માતૃ નરસિંહ દેવસ્ય સભાકવિના વિદ્યાધરેણ “એકાવલીનાટિકા” વિનિર્મિતા । વિશ્વપ્રસિદ્ધ-વિશ્વનાથ કવિરાજેન “સાહિત્યદર્પણઃ”, “ચન્દ્રકલા” નાટિકા અન્યાનિ બહુગ્રન્થરત્નાનિ સંપાદિતાનિ । ચણ્ડિદાસેન “કાવ્યપ્રકાશદીપિકા” વિનિર્મિતા । સાન્ધિ-વિગ્રહિક-મહામહોપાધ્યાય-સામન્તચન્દ્રશેખરેણ “સિદ્ધાન્તદર્પણઃ” સંપાદિતઃ । કૃષ્ણાનન્દ-સાન્ધિવિગ્રહ-મહાપાત્રેણ “સહૃદયાનન્દ” -મહાકાવ્યં વિરચિતમ્ । રાધામોહન બક્સિના “ભારત ભ્રમણ” -કાવ્યમકારિ । સાહિત્ય ક્ષેત્રે કવિચન્દ્ર ભુવનેશ્વર રથસ્ય “લક્ષણા પરિણયઃ”, વીરબલભદ્રપુર શાસન નિવાસિનઃ મધુસૂદન તર્ક વાચસ્પતેઃ “હનુમત્સંન્દેશઃ”, “તારા શશાંકઃ”, “માયાશવરી”, “લક્ષ્મીશતકં”, “ગજશતકં”, “સોમનાથ-શતકાનિ ચ પ્રસિદ્ધાઃ ગ્રન્થાઃ । પુરી-સદાશિવ-સંસ્કૃત-સંસ્થાનસ્ય પ્રતિષ્ઠાપકેન અધ્યક્ષ ચરેણ આચાર્ય હરિહર દાશેન ચ બહુગ્રન્થાઃ વિરચિતાઃ । તિગિરિઆ-નિવાસિના ભુવનેશ્વર-મિશ્ર-બડપણ્ડા-મહોદયેન “આનન્દ-વૃન્દાવન-ચમ્પૂઃ” સંકલિતઃ । મહામહોપાધ્યાય સદાશિવ મિશ્રેણ “ચન્દન ચમ્પૂઃ”, “કલ્યાપત્ ધર્મસંગ્રહૌ” ચ વિરચિતૌ । સદાશિવ-સંસ્કૃત-મહાવિદ્યાલય- ભૂતપૂર્વાધ્યક્ષેણ વિશ્વનાથ-મહાપાત્રેણ “કાઞ્ચી વિજયઃ”, “સરસ્વતી વિલાસઃ”, “સાવિત્રી પરિણયઃ” પ્રમુખાઃ ગ્રન્થા વિલિખિતાઃ । ગોપબન્ધુ વિદ્યાભૂષણેન “રુદ્ધદ્ધારઃ”, “કન્યોદ-રાજવંશ ચરિતમ્”, “માઠરવંશઃ” ગ્રન્થાઃ સંકલિતાઃ । કવિશેખર-આર્ત્તત્રાણ-મિશ્રેણ “કાશીશદર્પદલનં” પ્રસ્તૂતમ્ । સુદર્શન-પાઠિના “દીપિકા નાઠકમ્”, “સિંહલ વિજય નાઠકમ્”, “કરુણા પારિજાતઃ”, “પાદુકાવિજયઃ” ઇત્યાદીનિ નાટકાનિ લિખિતાનિ । બ્રહ્મપુર-નિવાસિના અનન્ત-ત્રિપાઠિના “નિબન્ધમાલા”, “લાવણ્યવતી” - “વૈદેહીશ વિલાસયોઃ સંસ્કૃતાનુવાદાશ્ચ “ સંપાદિતાઃ । પણ્ડિત -પ્રબોધ-કુમાર-મિશ્રેણ “મલય દૂતમ્”, “સ્વપ્નદૂતમ્”, “બન્દિન આત્મકથા” દિ ગ્રન્થાઃ વિરચિતાઃ । એતદતિરિકા અર્વાચિનેષુ ગોપીનાથ-મહાપાત્રસ્ય “કાલિદાસ કવિતારસ-માધુરી”, “જગન્નાથાષ્ટકમ્”, “દીનબન્ધ્વષ્ટકમ્”, કાલિદાસાષ્ટકાનિ અનુપમાનિ સન્તિ । જગન્નાથ રથસ્ય “અનુભૂતિ શતકમ્”, ગોવિન્દચન્દ્ર મિશ્રસ્ય “જયદેવ પ્રશસ્તિઃ”, હરિહર નન્દસ્ય “સિદ્ધાન્ત કૌમુદી ટીકા”, હરેકૃષ્ણ મહતાવસ્ય “ચાણક્ય વિજયમ્”, ચન્દ્રશેખર મિશ્રસ્ય “જગન્નાથ શતકમ્”, જયકૃષ્ણ મિશ્રસ્ય “માતૃમુક્તિ મુક્તાવલી”, બાનામ્બર આચાર્યસ્ય “કેન્દુઝર રાજાનઃ ચરિતમ્”, સીતાદેવી ખાડંગાયાઃ “અરણ્યરોદનમ્”, વિશ્વનાથ વર્મણઃ “શ્રીવર્મ રુક્મિણી પરિણયઃ”, રાધાનાથ રાયસ્ય “ભારતી વન્દના”, વાઉરી બન્ધુ નન્દસ્ય “મનોદૂતમ્”, દયાનિધિ મિશ્રસ્ય “સૂર્યદૂતમ્”, નીલકંઠ વાચસ્પતિનઃ “ગંગાધર ચમ્પૂઃ”, સુદર્શન મિશ્રસ્ય “સુદર્શનાનન્દ ચમ્પૂઃ”, ગોપીનાથ દાશસ્ય “શ્રીદાશ પુષ્પાઞ્જલિઃ”, મદનમોહન કરસ્ય “ગ્રહયાગ

પદ્ધતિઃ", ત્રિવિક્રમ પતિનઃ "ગોપબન્ધુ સ્મૃતિઃ", જગન્નાથ રથસ્ય "નાગરિકમુદ્બોધનમ્", વિષકંઠ વાચસ્પતિનઃ "વાણીવિલાસઃ", કામાક્ષી પ્રસાદ શર્મણઃ "કામાક્ષી સ્તોત્ર રત્નમાલા", લડુકેશ્વર શતપથિનઃ "કાલિદાસ દશકમ્", ગોપીનાથ રથસ્ય "વિધિવિડમ્બનમ્", કૃષ્ણચન્દ્ર આચાર્યસ્ય "સુકવિ મહિમા", ગુણનિધિ ત્રિપાઠિનઃ "પુરુષોત્તમ માહાત્મ્યમ્", કુરામણિ પાઠિશર્મણઃ "નિયતિ" પત્રિકાયાં લિખિત-શ્લોકાઃ, ગણેશ્વર રથસ્ય "લિંગરાજાયતનમ્", આનન્દ મહાપાત્રસ્ય "શ્રીરાધિકા પ્રપત્તિઃ", વાસુદેવ મહાપાત્રસ્ય "સાવિત્રી પરિણયમ્", રમાકાન્ત મિશ્રસ્ય "મહાત્માગાન્ધીઃ", હરેકૃષ્ણ શતપથિનઃ "કવિશતકમ્", "ગંગાજલ દૂષિતમ્", વનમાલિ-વિશ્વાલસ્ય "ઋતુપર્ણા", "જિજિવિષા", "વિવેકલહરી", "વ્યથા", "દારુબ્રહ્મ", "પ્રિયતમા" -પ્રમુખાઃ ગ્રન્થાઃ, કેશવ ચન્દ્ર દાશસ્ય "પ્રણય પ્રદીપમ્", "હૃદયેશ્વરી", "મહાતીર્થમ્", "અલકા", "ઈશા", "ભિન્ન પુલિનમ્", "પ્રતિપત્", "નિકષા", "ઋતમ્", "વિસર્ગઃ"," શશિરેખા", "Oંશાન્તિઃ", પ્રમુખાશ્ચ બહુગ્રન્થાઃ, હરેકૃષ્ણ મેહેરસ્ય બહવ અનુવાદિત-ગ્રન્થાઃ, પ્રદીપ્ત નન્દસ્ય "શ્રીક્ષેત્રસુધાનિધિઃ", "શ્રીજગન્નાથ દર્શનમ્", "ભક્તિનિર્ઝરિણી", "શિવાર્ચ્ચન પ્રદીપાઃ" ગ્રન્થાઃ, દિગમ્બર મહાપાત્રસ્ય "ઉત્કલોદયઃ", "સુરેન્દ્ર ચરિત મહાકાવ્યમ્", "ઋતુચક્રમ્", "ભવતે રોચતે યથા", "રંગરુચિરમ્", "વ્યસ્તરાગમ્" ગ્રન્થાઃ, વૈકુણ્ઠ વિહારિનન્દસ્ય "શરણાગતિ સ્તોત્રમ્" મહામહોપાધ્યાય-પણ્ડિત-ગોવિન્દ ચન્દ્ર મિશ્રસ્ય "શ્રીસારલા શતકં", "વૈજયન્તી શતકં", "પ્રસેન વિજય ચમ્પૂઃ", "શ્રીરામ લીલામૃતમ્", "વદનચન્દ્ર-પ્રકાશિકા" દયો ગ્રન્થાઃ, પ્રમોદ ચન્દ્ર મિશ્રસ્ય "ઉત્કલગૌરવમ્", "અન્યોક્તિ પઞ્ચાશિકા", "મૂર્ખશતકં", "વ્યોમયાન શતકં", "ચન્દ્રદૂતમ્", ચાન્યાનિ કાવ્યરત્નાનિ ચ સન્તિ । ઉપર્યુક્તાઃ સંસ્કૃતજ્ઞાઃ ઉત્કલેષુ શાસ્ત્રિય-કાવ્ય- સંગીત-નાટક-અલંકાર-ગાન્ધર્વ-એકાંકિકા-અભિનય-કલા-સંસ્કૃતિ-સાહિત્યાદિ-ક્ષેત્રેષુ પ્રશંસનીયા ભવન્તિ ।

વૈદિકક્ષેત્રે અથર્વ વેદસ્ય "પૈપલ્લાદ શાખા" ઉત્કલેષુ સંગૃહીતા । ભૌમ-સોમવંશ-રાજત્વસમયે મુરારિકવિના "અનર્ઘ રાઘવ" -નાટકં પ્રણીતમ્ । આચાર્ય-શતાનન્દેન "ભાસ્વતી" પ્રકાશિતા । તદતિરિક્તૌ તેન "શતાનન્દ રત્નમાલા", "શતાનન્દ સંગ્રહઃ" -નામકૌ ગન્થૌ વિરચિતૌ । પુરુષોત્તમદેવસ્ય રાજનિ વૈષ્ણવધર્મો વિસ્તારિતઃ । અસ્મિન્ સમયે ધર્મ-પ્રચાર-ક્ષેત્રે શ્રીધરસ્વામી, રઘુત્તમ તીર્થઃ, આનન્દગિરિઃ, રાય રામાનન્દ-પ્રમુખાઃ ઉત્કલીયાઃ વરેણ્યા-વૈષ્ણવાઃ સ્વ સ્વ કાર્યાણિ સંપાદિતવન્તઃ ।

તક્ષશિલાયાઃ પ્રધાનાચાર્યો માધ્યમિકવાદિ-બૌદ્ધનેતા નાગાર્જુનોઽપિ ઉત્કલીયઃ ઇતિ ઐતિહાસિકા નિરુપયન્તિ । પુરીમણ્ડલમણ્ડિતઃ આર્યા સપ્તશત્યાઃ લેખકો ગોવર્ધનાચાર્યઃ પ્રસિદ્ધઃ । તદતિરિક્તાઃ નીલામ્બર આચાર્ય-ઉદયનાચાર્ય-બલભદ્રાદયો વિદ્વાંસઃ ઉત્કલજનનીં કૃતાર્થીકૃતવન્તઃ । ધર્મશાસ્ત્રક્ષેત્રેષુ ગંગવંશ-યુગીયાઃ વાજપેયિનઃ અગ્રગણ્યાઃ । તેષુ ભારદ્વાજગોત્ર-શમ્ભુકર વાજપેયી પ્રસિદ્ધઃ । તત્કૃતિષુ "અગ્નિહોત્ર હોમપદ્ધતિઃ", "અગ્નિહોત્રહોમઃ", "પ્રાયશ્ચિત પદ્ધતિઃ", "દર્શ-પૌર્ણમાસેષ્ટિ પદ્ધતિઃ", "દુર્બલકર્મ પદ્ધતિઃ", "નિરુઢ પશુયાગ પદ્ધતિઃ", "સ્માર્ત્તરત્નાવલી", પ્રમુખાઃ ગ્રન્થાઃ વિશ્વ- પ્રસિદ્ધાઃ । "શમ્ભુકર પદ્ધતિઃ" અસ્ય મહાન્ ધર્મશાસ્ત્રિય-ગ્રન્થઃ । ત્રયોદશ-શતાબ્દીય- વિદ્યાકર વાજપેયિના અષ્ટભાગાત્મકો નિત્યાચાર પદ્ધતિર્વિનિર્મિતા । અધુના એસિઆટિક્ સોસાઇટ્ દ્વારા પ્રકાશિતા ચ । વિદ્યાકરસ્ય પ્રિયશિષ્ય-રામચન્દ્ર વાજપેયિના નૈમિષ્યારણ્યે બહુકાલં સંન્યસ્ય બહુગ્રન્થાઃ વિરચિતાઃ ।

મહારાજ-પુરુષોત્તમ-દેવેન “અભિનવ ગીતગોવિન્દમ્”, “મુક્તિચિન્તામણિઃ”, “ગોપાલાર્ચનપદ્ધતિઃ”, “નામમાલિકા”, “આનન્દવિલાસઃ”, “દશગ્રીવ વધઃ”, “જાનકી પ્રમોદઃ”, “કુવલયાશ્વચરિતમ્”, “અભિનવ વેણીસંહારમ્”, “દુર્ગોત્સવઃ”, “ભુવનેશ્વરી પૂજા”, એવમન્યે ગ્રન્થાઃ વિરચિતાઃ । વિંશતિ-સર્ગાત્મકં “દશગ્રીવ વધ” -નાટકં કવીન્દ્ર-માર્કણ્ડેયસ્ય કૃતિરિતિ કેચન મન્યન્તે । તેન પુરુષોત્તમદેવસ્ય નામ્ના ભણિતમ્ ।

પઞ્ચદશ-શતકસ્ય મુકુન્દદેવસ્ય સભાપણ્ડિતેન કૃષ્ણદાસ-બડજેના-મહાપાત્રેણ “ગીતપ્રકાશકઃ” ગ્રન્થો વિરચિતઃ । પુરુષોત્તમ-મિશ્રેણ “નીલાદ્રિનાથ-શતકમ્”, નૈષધચરિત ટીકા-પ્રસૂતં “ભાગવત મહાકાવ્યમ્”, “રામચન્દ્રોદય કાવ્યમ્”, સંગીતનારાયણાદીનિ બહુશાસ્ત્રાણિ વિરચિતાનિ । અષ્ટાદશ-શતાબ્દિ-મણ્ડિત-પણ્ડિત-કૌણ્ડિન્ય-ગોત્રિય-રઘુનાથ-દાશેન બહુગ્રન્થાઃ સંકલિતાઃ । તેષુ “ભટ્ટીકાવ્ય-ટીકા”, “સાહિત્ય-ભૂષણમ્”, “વૃત્તાવલિઃ”, “કાલનિર્ણયઃ”, “શ્રાદ્ધનિર્ણયઃ”, “ઉત્પાત તરંગિણી”, “ન્યાય રત્નાવલિઃ”, “રઘુવંશ ટીકા”, “અમરકોશટીકા”, “કાવ્યપ્રકાશ ટીકા”, “શિશુપાલવધ ટીકા”, “વનદુર્ગા પૂજા”, “બર્દ્ધમાન પ્રકાશઃ”, “કારક નિર્ણયઃ”, “વૈદ્ય કલ્પલતા”, “સાર સિદ્ધાન્ત સંગ્રહા” ખ્યાઃ વ્યાકરણગ્રન્થાશ્ચ પ્રસિદ્ધાઃ વર્તન્તે । હરેકૃષ્ણપુર શાસન-નિવાસિના ગદાધર-રાજગુરુણા “ગદાધરપદ્ધતિઃ” સંપાદિતા । અષ્ટાદશાધ્યાયવિશિષ્ટોઽયં ગ્રન્થઃ સંપ્રતિ અષ્ટાધ્યાયવિશિષ્ટતયા ઉપલભ્યતે ।

નાટકક્ષેત્રે ભટ્ટનારાયણઃ શ્રેષ્ઠનાટકકારઃ । તેન “વેણીસંહાર” -નાટકં વિલિખિતમ્ । રાજ્ઞઃ કપિલેશ્વરસ્ય “પરશુરામ વિજયઃ”, નારાયણાનન્દસ્ય “શ્રીરામચન્દ્રાનન્દમ્”, જીવદેવ- પુત્રસ્ય દ્વિતીય જયદેવસ્ય “પીયૂષ લહરી નાટિકા”, “વૈષ્ણવામૃત નાટકમ્”, ચ પ્રમુખાનિ સન્તિ ।

અભિધાન-ક્ષેત્રે પુરુષોત્તમદેવસ્ય “ત્રિકાણ્ડ શેષઃ”, “હારાવલી”, મેદિનીકરસ્ય “મેદિની” કોશાઃ શ્રેષ્ઠાઃ । વ્યાકરણ-ક્ષેત્રે માર્કણ્ડેય મિશ્રસ્ય “પ્રાકૃત સર્વસ્વઃ”, જુમરસ્ય “જુમર વ્યાકરણમ્”, રામભદ્રસ્ય “સિદ્ધાન્ત ચન્દ્રિકા”, અનુભૂતિ સ્વરૂપાચાર્યસ્ય “સારસ્વત વ્યાકરણમ્”, “પ્રબોધ ચન્દ્રિકા” દીનિ દૃષ્ટિપથે વિલસન્તિ ।

તન્ત્રગ્રન્થેષુ “ઉડ્ડિયાન તન્ત્રમ્” “ઉડભાસ્વર તન્ત્રમ્” “ઉડ્ડિશ” તન્ત્રાણિ ચ ઉત્કલેષુ વિનિર્મિતાનિ । અન્યેષુ તન્ત્રગ્રન્થેષુ ગોદાવર મિશ્રસ્ય “યન્ત્ર ચિન્તામણિઃ”, “શારદાર્ચ્ચન પદ્ધતિઃ”, પુરુષોત્તમદેવસ્ય “ભુવનેશ્વરી પલ્લવઃ”, “પ્રાકૃત ચણ્ડી”, વિદ્યાધર બાજપેયિનઃ “શક્તિ પ્રતિમા પ્રતિષ્ઠા”, વર્દ્ધન મહાપાત્રસ્ય “દુર્ગોત્સવ ચન્દ્રિકા”, વાસુદેવ રથસ્ય “ભુવનેશ્વરી પ્રકાશઃ”,લક્ષ્મેશ્વર રથસ્ય “જ્ઞાનાવલી” તન્ત્રાણિ ચ સ્મર્તવ્યાનિ ।

દર્શનક્ષેત્રેઽપિ ઉત્કલીયા ધુરન્ધરા આસન્ । જ્ઞાનસિદ્ધેઃ કર્તા ઇન્દ્રભૂતિઃ, બૌદ્ધ-દાર્શનિકો ધર્મકીર્ત્તિઃ, નાગાર્જુનાદયશ્ચ ઉત્કલીય- સન્તાનાઃ આસન્ । શ્રીધરસ્વામિનઃ “ગીતા-ભાગવત ટીકે” પ્રસિદ્ધે । વાલેશ્વર-રેમુણા-ભૂમિગૌરવસ્ય બલદેવ વિદ્યાભૂષણસ્ય બ્રહ્મસૂત્રોપરિ “ગોવિન્દભાષ્યમ્” પ્રસિદ્ધમ્ । એતદતિરિક્તં તેન “ઐશ્વર્યકાદમ્બિની”, “પ્રમેય રત્નાવલી”, “લઘુભાગવતામૃતમ્”, “કાવ્યકૌસ્તુભઃ”, “વિષ્ણુસહસ્રનામ ભાષ્યમ્”, “સિદ્ધાન્તરત્નમ્”, “ભગવદ્ગીતાભાષ્યમ્”, વેદાન્ત સ્યમન્તકાદયઃ બહુગ્રન્થાઃ વિરચિતાઃ । જગન્નાથ રથસ્ય “જૈનદર્શનમ્”, લોકનાથ શાસ્ત્રિણઃ “સિદ્ધાન્ત મુક્તાવલી ટીકા”, દામોદર મહાપાત્રસ્ય “સર્વદર્શન કૌમુદી”, “યોગતત્ત્વ વારિધિઃ”, પ્રો૦નીલકંઠ-શતપથિનઃ “સામાન્ય-દર્શનમ્”, “દર્શનેષુ તત્ત્વચતુષ્ટયમ્”, શિવાર્ચ્ચનપદ્ધત્યાદયો

ગ્રન્થા અનુપમાઃ । પ્રો૦ પ્યારીમોહન પટ્ટનાયકસ્ય “ન્યાય પરિભાષા”, “ન્યાયસૂત્ર વાત્સ્યાયન ભાષ્યસ્ય રૈખિક પ્રતિનિરૂપણમ્”, “વૈશેષિકસૂત્રોપસ્કારસ્ય રૈખિક પ્રતિનિરૂપણમ્”, “મીમાંસા પરિભાષાયાઃ રૈખિક પ્રતિનિરૂપણમ્”, “સાંખ્યકારિકાયાઃ રૈખિક પ્રતિનિરૂપણમ્”, “વેદાન્તસારસ્ય રૈખિક પ્રતિનિરૂપણમ્” ઇત્યાદયો ગ્રન્થાઃ પ્રસિદ્ધાઃ રેખાચિત્રપરકાઃ સન્તિ । પ્રો૦ પ્રલય કુમાર નન્દસ્ય “યોગલક્ષણ-વિમર્શઃ”, “અક્ષપાદીય-કણાદીય-દર્શનયોઃ જાતિસ્વરૂપવિમર્શઃ” ઇતિ દ્વૌ ગ્રન્થૌ પ્રસિદ્ધૌ ।

ગવેષણાક્ષેત્રે ડૉ સત્યનારાયણ રાજગુરુઃ, કેદાર નાથ મહાપાત્રઃ, ઐતિહાસિકો વિનાયક મિશ્રઃ, પણ્ડિત નીલકંઠ દાશઃ, કૃષ્ણચન્દ્ર રાજગુરુઃ, અધ્યાપક-ભગવાન-પણ્ડાદયઃ ઉત્કલીય-વિદ્વાંસઃ અગ્રગણ્યાઃ રાજન્તે । કેચન ઐતિહાસિકાઃ કાલિદાસ-દિઙ્નાગૌ, ઉત્કલીયૌ ઇતિ સમામનન્તિ, તન્મૃગ્યમ્ । અન્તતો ગત્વા સંસ્કૃતં પ્રતિ ઉત્કલીયાનાં અવદાનં ચિરસ્મરણીયં ન વિસ્મરણીયમિત્યુક્ત્વા લેખં સમાપયામિ । અલમતિવિસ્તરેણ । જયતુ સંસ્કૃતમ્ । જયતુ ઉત્કલમ્ । જયતુ ભારતમ્ ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

સહાયકગ્રન્થાઃ -

૧- A History of Sanskrit Literature. Macdonell 1899

૨- History of Sanskrit Literature. Dr. S N Dasgupta and Dr. S.K De 1941

૩- The Literature of Orissa vol-2 W W Hunter

૪- Descriptive Catalogs of Sanskrit Manuscripts in the Collection of the Asiatic Society of Bengal.

૫- Bihar and Orissa Research Society, Odisha Acedemy.

૬- Inscription of Orissa. Vol-1, 2 and 3 Prof- S N Rajguru

૭- Govardhan Acharya and Udayana Acharya-Kedarnath Mohapatra O. H.P. J. Vol-7

૮- Kabi Udayanacharya, Jhankar 3rd year 6th vol

૯- ઓડિઆ સાહિત્ય કુ ઉત્કલીય સંસ્કૃતિર દાન- કેદારનાથ મહાપાત્ર, ઓડિઆ સાહિત્ય એકાદેમી ભુવનેશ્વર, ૧૯૮૨

૧૦- The contribution of utkal to Sanskrit literature. Dr. K.B.Tripathy

૧૧- સંસ્કૃત સાહિત્યર ઇતિહાસ- ડૉ ગોપીનાથ મહાપાત્રઃ

૧૨- ઓડિશારે સંસ્કૃત ચર્ચ્ચાર પરંપરા- ઓડિશા સાહિત્ય એકાડેમી-૧૯૮૨

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Discussion of Sanskrit (Literature) in Utkala-Odisha*

pdf was typeset on May 15, 2021

Please send corrections to *sanskrit@cheerful.com*